# Shri KumAra Mangala Stotram

# શ્રીકુમારમઙ્ગલસ્તોત્રમ્

## Document Information

Text title : Kumara Mangala Stotram

File name : kumAramangalastotram.itx

Category : subrahmanya, mangala

Location : doc_subrahmanya

Transliterated by : Sivakumar Thyagarajan Iyer

Proofread by : Sivakumar Thyagarajan Iyer, PSA Easwaran, Sreenivasa Rao Bhagavatula

Description/comments : From stotrArNavaH 07-05

Latest update : June 8, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીકુમારમઙ્ગલસ્તોત્રમ્

ૐ શ્રીગણેશાય નમઃ ।
અથ શ્રીકુમારમઙ્ગલસ્તોત્રમ્ ।
યજ્ઞોપવીતીકૃતભોગિરાજો
 ગણાધિરાજો ગજરાજવક્ત્રઃ ।
સુરાધિરાજાર્ચિતપાદપદ્મઃ
 સદા કુમારાય શુભં કરોતુ ॥ ૧॥

વિધાતૃપદ્માક્ષમહોક્ષવાહાઃ
 સરસ્વતીશ્રીગિરિજાસમેતાઃ ।
આયુઃ શ્રિયં ભૂમિમનન્તરૂપં
 ભદ્રં કુમારાય શુભં દિશન્તુ ॥ ૨॥

માસાશ્ચ પક્ષાશ્ચ [દિનાનિ તારાઃ]
 રાશિશ્ચ યોગાઃ કરણાનિ સમ્યક્
ગ્રહાશ્ચ સર્વેઽદિતિજાસ્સમસ્થાઃ
 શ્રિયં કુમારાય શુભં દિશન્તુ ॥ ૩॥

ઋતુર્વસન્તઃ સુરભિઃ સુધા ચ
 વાયુસ્તથા દક્ષિણનામધેયઃ ।
પુષ્પાણિ શશ્વત્સુરભીણિ કામઃ
 શ્રિયં કુમારાય શુભં કરોતુ ॥ ૪॥

ભાનુસ્ત્રિલોકીતિલકોઽમલાત્મા
 કસ્તૂરિકાલઙ્કૃતવામભાગઃ ।
પમ્પાસરશ્ચૈવ સ સાગરશ્ચ
 શ્રિયં કુમારાય શુભં કરોતુ ॥ ૫॥

ભાસ્વત્સુધારોચિકિરીટભૂષા
 કીર્ત્યા સમં શુભ્રસુગાત્રશોભા ।

સરસ્વતી સર્વજનાભિવન્દ્યા
　શ્રિયં કુમારાય શુભં કરોતુ ॥ ૬॥

આનન્દયન્નિન્દુકલાવતંસો
　મુખોત્પલં પર્વતરાજપુત્ર્યાઃ ।
સ્પૃસન્ સલીલં કુચકુમ્ભયુગ્મં
　શ્રિયં કુમારાય શુભં કરોતુ ॥ ૭॥

વૃષસ્થિતઃ શૂલધરઃ પિનાકી
　ગિરિન્દ્રજાલઙ્કૃતવામભાગઃ ।
સમસ્તકલ્યાણકરઃ શ્રિતાનાં
　શ્રિયં કુમારાય શુભં કરોતુ ॥ ૮॥

લોકાનશેષાનવગાહમાના
　પ્રાજ્યૈઃ પયોભિઃ પરિવર્ધમાના ।
ભાગીરથી ભાસુરવીચિમાલા
　શ્રિયં કુમારાય શુભં કરોતુ ॥ ૯॥

શ્રદ્ધાં ચ મેધાં ચ યશશ્ચ વિદ્યાં
　પ્રજ્ઞાં ચ બુદ્ધિં બલસમ્પદૌ ચ
આયુષ્યમારોગ્યમતીવ તેજઃ
　સદા કુમારાય શુભં કરોતુ ॥ ૧૦॥

॥ ઇતિ શ્રીકુમારમઙ્ગલસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Sivakumar Thyagarajan Iyer
Proofread by Sivakumar Thyagarajan Iyer, PSA Easwaran

*Shri KumAra Mangala Stotram*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*